4. अये लेखनि! तव महिमा अपूर्वा। सकले विश्वे त्वम् एव ज्ञानं विज्ञानं च प्रसारयसि। काव्यैः रूपकैः कथाभिः गीतैः च जनान् विनोदयसि। तूलिकायाः सहयोगेन कर्गदान् चित्रमयान् करोषि, सर्वान् च आकर्षसि। विविधेषु विज्ञापनेषु समाचारपत्रेषु पत्रिकासु च तव निपुणतां दृष्ट्वा चकिताः भवामः। अनवरतं कर्गदेषु धावन्ती अपि त्वम् कदापि श्रान्ता न भवसि। अस्माकं तु त्वमेव शरणम्। तव सहायतया एव वयं कक्षासु प्रश्नोत्तराणि लिखामः, पुनः पुनः अभ्यासं कुर्मः। परीक्षाकाले तु त्वमेव अस्माकम् शस्त्रम्। तव उपकारान् कः विस्मर्तुम् शक्नोति? सम्पूर्णः संसारः तव भक्तः। त्वम् वन्दनीया असि।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) लेखनी कथाभिः गीतैः कान् विनोदयति? ..........

(ख) का वन्दनीया अस्ति? ..........

(ग) परीक्षाकाले छात्राणाम् शस्त्रम् का? ..........

(घ) लेखन्याः भक्तः कः? ..........

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) वयं लेखन्याः सहायतया कक्षासु किम् कुर्मः?

..........

(ख) कस्मिन् काले लेखनी एव अस्माकं शस्त्रम्?

..........

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) सततम् इति अर्थाय गद्यांशे किम् पदम् प्रयुक्तम्?

(*i*) निरन्तरम् (*ii*) अनवरतम् (*iii*) शीघ्रम् (*iv*) अर्थम् ..........

(ख) "सम्पूर्णः संसारः तव भक्तः" अत्र तव इति पदम् कस्मै प्रयुक्तम्?

(*i*) लेखिन्यै (*ii*) कथायै (*iii*) पत्रिकायै (*iv*) समाचारपत्राय ..........

(ग) महिमा इत्यस्य विशेषणपदम् किम्?

(*i*) अपूर्वः (*ii*) अपूर्वा (*iii*) अपूर्वम् (*iv*) अपूर्व ..........

(घ) अनुच्छेदात् सम्बोधनपदम् चित्वा लिखत।

(*i*) लेखनि! (*ii*) कगर्द (*iii*) शरणम् (*iv*) विश्व ..........

5. श्रीकृष्णस्य पितुः नाम वसुदेवः मातुः च नाम देवकी आसीत्। श्रीकृष्णस्य मातुलः कंसः दुष्टः आसीत्। सः देवकीम् वसुदेवम् च कारागारे अक्षिपत्। यदा श्रीकृष्णस्य जन्म अभवत् तदा वसुदेवः शिशुम् श्रीकृष्णम् करण्डके निधाय च यमुनायाः नद्याः पारे गोकुलम् अनयत्। तत्र तस्य मित्रम् नन्दः अवसत्। यशोदा नन्दौ

श्रीकृष्णस्य पितरौ अभवत्। श्रीकृष्णम् मारयितुम् कंसः अनेकान् राक्षसान् प्रेषितवान्। श्रीकृष्ण तेषाम् संहारं कृत्वा सर्वान् रक्षितवान्।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) कस्य पितुः नाम वसुदेवः आसीत्? ..........................

(ख) श्रीकृष्णस्य मातुः नाम किम् आसीत्? ..........................

(ग) श्रीकृष्णस्य मातुलः कः आसीत्? ..........................

(घ) वसुदेवस्य मित्रस्य नाम किम् आसीत्? ..........................

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) वसुदेवः श्रीकृष्णम् कथम् गोकुलम् अनयत्?

..............................................................................

(ख) श्रीकृष्णं मारयितुम् कंसः कान् प्रेषितवान्?

..............................................................................

**III. निर्देशानुसारम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) मातुलः पदस्य अर्थम् चित्वा लिखत।

*(i)* मामा *(ii)* नाना *(iii)* चाचा *(iv)* दादा ..........................

(ख) मातुः इति पदे का विभक्तिः अस्ति?

*(i)* चतुर्थी *(ii)* पञ्चमी *(iii)* षष्ठी *(iv)* सप्तमी ..........................

(ग) अनुच्छेदे अनयत् क्रियापदस्य कर्तृपदम् किम् अस्ति?

*(i)* शिशुम् *(ii)* गोकुलम् *(iii)* श्रीकृष्णम् *(iv)* वसुदेवः ..........................

(घ) "श्रीकृष्णस्य मातुलः कंसः दुष्टः आसीत्?" इति वाक्ये दुष्टः विशेषणस्य विशेष्यपदं किम् अस्ति?

*(i)* श्रीकृष्णस्य *(ii)* मातुलः *(iii)* कंसः *(iv)* आसीत् ..........................

6. विद्या सर्वश्रेष्ठं सर्वप्रधानं धनं भवति। संसारस्य अन्यानि सर्वाणि धनानि व्यये कृते नश्यन्ति परम् विचित्रम् एतत् विद्याधनं यत् व्यये कृते वर्धते। विद्यां विना नरः पशुतुल्यः भवति। विद्यया जीवनम् आलोकितं भवति अज्ञानान्धकारं च दूरी भवति। विद्यया एव नरः प्रतिष्ठितः भवति। विद्वान् एव सर्वत्र पूज्यते। विद्याधनं केनापि चोरयितुं न शक्यते। विद्याधनं भ्रातृभाज्यं न भवति। विद्याधनं भारकारि अपि न भवति।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) सर्वश्रेष्ठं धनं किम् भवति? ..........

(ख) विचित्रं धनं किम्? ..........

(ग) व्यये कृते किम् वर्धते? ..........

(घ) कः सर्वत्र पूज्यते? ..........

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) विद्याधनं विचित्रं किमर्थम् अस्ति?

..........

(ख) विद्यया जीवनं कीदृशं भवति?

..........

**III. निर्देशानुसारम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) 'विद्यां विना नरः पशुतुल्यः भवति।' पशुतुल्यः इति पदस्य विशेष्यपदम् किम्?

(*i*) पशु (*ii*) विद्या (*iii*) नरः (*iv*) किपपि न ..........

(ख) संसारस्य इति पदे का विभक्तिः?

(*i*) षष्ठी (*ii*) सप्तमी (*iii*) पञ्चमी (*iv*) चतुर्थी ..........

(ग) अज्ञानान्धकारम् इति पदस्य उचितं सन्धिच्छेदं चिनुत।

(*i*) अज्ञाना + न्धकारम् (*ii*) अज्ञा + नान्धकारं

(*iii*) अज्ञानान्ध + कारम् (*iv*) अज्ञान + अन्धकारम् ..........

(घ) 'विद्यया एव नरः प्रतिष्ठित भवति?' अस्मिन् वाक्ये अव्ययपदं किम्?

(*i*) एव (*ii*) नरः (*iii*) विद्यया (*iv*) प्रतिष्ठितः ..........

**7.** पुरा एकः हरिभक्तः आसीत्। तस्य अभिधानम् प्रह्लादः आसीत्। तस्य जनकः हिरण्यकश्यपः एकः राक्षसः आसीत्। सः हरिभक्तान् मारयितुम् इच्छति स्म अतः सः प्रह्लादम् अपि मारयितुम् ऐच्छत्। तस्य भगिनी होलिका प्रह्लादम् नीत्वा अग्नौ अतिष्ठत्। देववरदानम् आसीत् यत् अग्निः ताम् प्रज्वालयितुम् न शक्नोति स्म। होलिका अग्नौ ज्वलिता अभवत् परम् प्रह्लादः सुरक्षितः ईश्वरम् स्मरन् बहिः आगच्छत्। पुनः ईश्वरः स्वयम् नरसिंहस्य रूपे संसारे अवतरत् हिरण्यकश्यपं च अमारयत्।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) हरिभक्तः कः आसीत्? ..........

(ख) राक्षसस्य नाम किम् आसीत्? ..............................

(ग) राक्षस: कम् मारयितुम् ऐच्छत्? ..............................

(घ) प्रह्लादम् नीत्वा अग्नौ का अतिष्ठत्? ..............................

## II. पूर्णवाक्येन उत्तरत।

(पूरे वाक्य में उत्तर दीजिए।)

(क) यदा होलिका प्रह्लादं नीत्वा अग्नौ अतिष्ठत् तदा किम् अभवत्?

..............................

(ख) हिरण्यकश्यप: किं कर्तुम् ऐच्छत्?

..............................

## III. निर्देशानुसारम् उत्तरत।

(निर्देश के अनुसार उत्तर दीजिए।)

(क) अनुच्छेदात् 'क्त्वा' 'तुमुन्' च प्रत्ययो: एकैकम् उदाहरणम् विचित्य लिखत।

*(i)* अग्नौ, प्रज्वालयितुम् *(ii)* ऐच्छत्, सुरक्षित

*(iii)* नीत्वा, मारयितुम् *(iv)* मारयितुम्, प्रज्वालयितुम् ..............................

(ख) "स: हरिभक्तान् मारयितुम् इच्छति स्म"। अत्र इच्छति स्म क्रियापदस्य कर्तृपदं किम् अस्ति?

*(i)* हरिभक्तान् *(ii)* मारयितुम् *(iii)* न किमपि *(iv)* स: ..............................

(ग) अनुच्छेदे भगिनी इति पदस्य अर्थ: क:?

*(i)* भार्या *(ii)* भगवती *(iii)* माता *(iv)* बहन ..............................

(घ) अतिष्ठत् इति क्रियापदस्य कर्तृपदं किम्?

*(i)* तस्य *(ii)* होलिका *(iii)* प्रह्लादम् *(iv)* अग्नौ ..............................

## 80–100 पदपरिमिताः गद्यांशाः

**उदाहरण–**

**निम्नलिखितगद्यांशान् कथाः वा पठित्वा उत्तराणि संस्कृतेन लिखत।**

(निम्नलिखित गद्यांशों अथवा अनुच्छेदों को पढ़कर प्रश्नों के उत्तर संस्कृत में दीजिए।)

1. अहो! रमणीया प्रातःकालस्य वेला। आकाशे खगाः कलरवं कुर्वन्ति। सूर्यः आकाशे उदयोन्मुखः अस्ति। वृद्धाः प्रबुद्धाः सन्ति। युवकाः प्रबुद्धाः सन्ति। युवतयः प्रबुद्धाः सन्ति। कृषकाः क्षेत्रं गच्छन्ति। बालाः विद्यालयं प्रति गच्छन्ति। सर्वे जनाः स्वकार्येषु लग्नाः सन्ति। मन्दः सुगन्धः पवनः वहति। सर्वत्र आनन्दमयम् वातावरणम् अस्ति। पुष्पाणि विकसन्ति। जनाः उद्यानेषु भ्रमन्ति। केचन् जनाः व्यायामं कुर्वन्ति। केचन् सूर्यं नमन्ति। सर्वे जनाः प्रसन्नाः स्फूर्तिवन्तः सन्ति। प्रातःकालस्य वेला सर्वेषु जनेषु नव-जीवनं संचरति। तापसाः आश्रमेषु यजन्ति। भक्ताः देवालयं गच्छन्ति। शिशवः विश्रामस्य पश्चात् प्रसन्नाः भवन्ति। मन्दिरेषु शंखनादः भवति। सरणिषु जनाः इतस्ततः आगच्छन्ति।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) प्रातःकालस्य वेला कीदृशी भवति?

**उत्तर–** रमणीया।

(ख) क्षेत्रम् प्रति के गच्छन्ति?

**उत्तर–** कृषकाः।

(ग) भक्ताः कुत्र गच्छन्ति?

**उत्तर–** देवालयम्।

(घ) प्रातःकाले मन्दिरेषु किम् भवति?

**उत्तर–** शंखनादः।

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) प्रातःकाले के के प्रबुद्धाः भवन्ति?

**उत्तर–** वृद्धाः प्रबुद्धाः भवन्ति, युवकाः प्रबुद्धाः भवन्ति, युवतयः च प्रबुद्धाः भवन्ति।

(ख) प्रातःकाले जनाः किम् किम् कुर्वन्ति?

**उत्तर–** प्रातःकाले जनाः उद्यानेषु भ्रमन्ति। केचन् जनाः व्यायामम् कुर्वन्ति। केचन् सूर्यम् नमन्ति।

**III. निर्देशानुसारम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) सुप्ताः इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(*i*) वृद्धाः (*ii*) युवतयः (*iii*) उदयोन्मुखः (*iv*) प्रबुद्धाः

**उत्तर–** (*iv*) प्रबुद्धाः

(ख) पक्षिण: इत्यर्थे क: शब्द: प्रयुक्त:?

(*i*) वेला (*ii*) युवतय: (*iii*) उदयोन्मुख: (*iv*) खगा:

**उत्तर**– (*iv*) खगा:

(ग) अनुच्छेदे संचरति क्रियापदस्य कर्तृपदं किम् अस्ति?

(*i*) नवजीवनम् (*ii*) वेला (*iii*) सर्वेषु (*iv*) जनेषु

**उत्तर**– (*iv*) वेला

(घ) "अहो! रमणीया प्रात:कालस्य वेला।" इत्यस्य वाक्ये वेला विशेष्यपदस्य विशेषणपदं किम्?

(*i*) अहो! (*ii*) रमणीया (*iii*) प्रात:कालस्य (*iv*) न किमपि

**उत्तर**– (*iii*) रमणीया

**IV. अनुच्छेदस्य शीर्षकं लिखत।**

(अनुच्छेद का शीर्षक लिखिए।)

**उत्तर**– प्रात:काल:।

**2.** वने लंकाया: नृप: रावण: छलेन सीताम् अहरत्। श्रीराम: लक्ष्मण: च वने इतस्तत: अभ्रमताम्। श्रीराम: सुग्रीवस्य सहायक: अभवत्। सुग्रीवस्य पवनकुमारस्य च सहायतया स: लंकाम् प्राविशत्। तत्र श्रीरामस्य रावणेन सह युद्धम् अभवत्। युद्धे श्रीराम: सकलान् राक्षसान् लंकापतिं रावणं च अमारयत्। श्रीराम: रावणस्य अनुजाय विभीषणाय लंकाया: राज्यम् अयच्छत्। तत: चतुर्दशवर्षाणां पश्चात् स: सीतया लक्ष्मणेन च सह अयोध्यां प्रति आगच्छत्। तत्र श्रीरामस्य राजतिलक: अभवत् श्रीरामस्य राज्ये सकला: अपि प्रजा: सुरक्षिता: प्रसन्ना: च आसन्। अत: रामस्य राज्यं प्रसिद्धम् अस्ति।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) सीताम् क: अहरत्?

**उत्तर**– रावण:।

(ख) श्रीरामस्य युद्धम् केन सह अभवत्?

**उत्तर**– रावणेन।

(ग) रावणम् क: अमारयत्?

**उत्तर**– श्रीराम:।

(घ) रावणस्य अनुज: क: आसीत्?

**उत्तर**– विभीषण:।

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) वने रावण: काम् अहरत्?

**उत्तर**– वने रावण: छलेन सीताम् अहरत्।

(ख) श्रीरामस्य राज्यं किमर्थम् प्रसिद्धम्?

**उत्तर–** श्रीरामस्य राज्ये सकलाः अपि प्रजाः सुरक्षिताः प्रसन्नाः च अभवन् अतएव रामराज्यं प्रसिद्धम्।

### III. निर्देशानुसारम् उत्तरत।

(निर्देश के अनुसार उत्तर दीजिए।)

(क) ''सुग्रीवस्य पवनकुमारस्य सहायतया सः लंकाम् प्राविशत्।'' वाक्ये प्राविशत् इति क्रियापदस्य कर्तृपदम् किम्?

(*i*) सुग्रीवः (*ii*) पवनकुमार (*iii*) लंकाम् (*iv*) सः

**उत्तर–** (*iv*) सः

(ख) ''रामस्य राज्यं प्रसिद्धम् अस्ति।'' अत्र प्रसिद्धम् विशेषणस्य विशेष्यपदं किम्?

(*i*) अतः (*ii*) रामस्य (*iii*) राज्यम् (*iv*) न किमपि

**उत्तर–** (*iii*) राज्यम्

(ग) अनुच्छेदे 'सह' इत्यस्य पदस्य योगेन रावणेन इति पदे का विभक्तिः प्रयुक्ताः?

(*i*) द्वितीया (*ii*) तृतीया (*iii*) चतुर्थी (*iv*) पञ्चमी

**उत्तर–** (*ii*) तृतीया

(घ) निम्नांकितेषु पदेषु कः अव्ययः न अस्ति?

(*i*) च (*ii*) ततः (*iii*) अपि (*iv*) सः

**उत्तर–** (*iv*) सः

### IV. गद्यांशस्य समुचितं शीर्षकम् लिखत।

(गद्यांश का उचित शीर्षक लिखिए।)

**उत्तर–** श्रीरामः।



## प्रायोगिकाभ्यासः

### निम्नलिखितगद्यांशान् कथाः वा पठित्वा उत्तराणि संस्कृतेन लिखत।

(निम्नलिखित गद्यांशों अथवा कथाओं को पढ़कर प्रश्नों के उत्तर संस्कृत में दीजिए।)

1. सुपोषः एकः चतुरः बालः अस्ति। अम्बाजनकौ च यदा तम् पश्यतः तदैव तुष्यतः। सुपोषस्य द्वे भगिन्यौ अपि स्तः। ते सर्वे प्रातः जनकम् अम्बां च नमन्ति। ज्येष्ठा भगिनी श्रुतिः पठने अतीव कुशला अस्ति। अनुजा अर्चना अपि कुशाग्रबुद्धिः अस्ति। ते सुपोषम् अपि पाठयतः। माता तेभ्यः सूपम् ओदनं च पचति। जनकः विनोदः सर्वेभ्यः मिष्ठान्नानि आनयति। सः सर्वेभ्यः क्रीडनकानि अपि आनयति। ते सर्वे ग्रीष्मावकाशेषु भ्रमणाय गच्छन्ति। सुपोषः स्वजनकस्य सहायकः भवति। श्रुतिः अर्चना च समये-समये अम्बायाः जनकस्य च सहायतां कुरुतः। ते सर्वे मिलित्वा एव सर्वाणि कार्याणि कुर्वन्ति। बालकाः तु सुयोग्याः चतुराः च सन्ति। अतः तेषां परिवारे समृद्धिः सुखं च स्तः।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) सुपोषः कीदृशः बालः अस्ति? ..........

(ख) पठने कुशला का अस्ति? ..........

(ग) कुशाग्रबुद्धिः का अस्ति? ..........

(घ) सर्वेभ्यः मिष्ठान्नानि कः आनयति? ..........

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) माता तेभ्यः किम् पचति?

..........

(ख) जनकः सर्वेभ्यः किम् किम् आनयति?

..........

**III. निर्देशानुसारम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) "ज्येष्ठा भगिनी श्रुतिः पठने अतीव कुशला अस्ति।" इति वाक्ये 'कुशला' विशेषणस्य विशेष्यपदं च किम् अस्ति?

(*i*) ज्येष्ठा (*ii*) भगिनी (*iii*) श्रुतिः (*iv*) अतीव ..........

(ख) "ते सर्वे प्रातः जनकम् अम्बां च नमन्ति।" अत्र नमन्ति क्रियापदस्य कर्तृपदम् किम् अस्ति?

(*i*) ते (*ii*) प्रातः (*iii*) जनकम् (*iv*) अम्बाम् ..........

(ग) अनुच्छेदे मिलित्वा इति पदे कः प्रत्ययः?

(*i*) तुमुन् (*ii*) क्त्वा (*iii*) ल्यप् (*iv*) क्त ..........

(घ) तदैव पदस्य उचितम् सन्धिच्छेदम् कुरुत।

(*i*) तदा + ऐव (*ii*) ततः + एव (*iii*) तदा + एव (*iv*) तदै + व ..........

**IV. गद्यांशस्य शीर्षकं लिखत।**

(गद्यांश का शीर्षक लिखिए।)

..........

2. सूर्यः तु अस्तम् गच्छति। अधुना सायंकालः भवति। खगाः स्वनीडानि गच्छन्ति। कमलानि म्लानानि भवन्ति कुमुदानि च विकसन्ति। आश्रमेषु तापसाः अनले यजन्ति। कृषकाः विश्रामम् आचरन्ति। उलूकाः इतः ततः भ्रमन्ति। मन्दिरेषु शंखानाम् शब्दः भवति। पथिकाः विश्रामाय तिष्ठन्ति। पाचकाः भोजनं पचन्ति। बालकाः

क्रीडाक्षेत्रात् स्व-गृहम् आगच्छन्ति। ते गृहम् आगत्य विविधान् आहारान् खादन्ति। जनाः तु गृहेषु चायपानम् कुर्वन्ति। केचन जनाः सायंकाले दूरदर्शनम् पश्यन्ति। बालकाः दुग्धं पिबन्ति। ततः ते पाठान् पठन्ति लिखन्ति च। सायंकाले तु सर्वत्र अन्धकारस्य राज्यम् एव भवति।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) खगाः कुत्र गच्छन्ति? ..............................

(ख) तापसाः कुत्र यजन्ति? ..............................

(ग) जनाः गृहेषु किम् पिबन्ति? ..............................

(घ) दुग्धं के पिबन्ति? ..............................

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) सायंकाले कानि म्लानानि भवन्ति कानि च विकसन्ति?

..............................................................................................

(ख) जनाः सायंकाले किम् कुर्वन्ति?

..............................................................................................

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) खाद्यान्नान् इत्यस्मै अनुच्छेदे किम् पदं प्रयुक्तम्? ..............................

(*i*) विविधान् (*ii*) आहारान् (*iii*) चायपानम् (*iv*) दुग्धम् ..............................

(ख) आगत्य इति पदे उपसर्ग-प्रकृतिप्रत्ययविभागं कुरुत।

(*i*) आ + गम् + ल्यप् (*ii*) आ + गच्छ् + अनीयर्

(*iii*) आग + ति + अनीयर् (*iv*) आ + गम् + अनीयर् ..............................

(ग) शंखानाम् इति पदे का विभक्तिः?

(*i*) द्वितीया (*ii*) पञ्चमी (*iii*) सप्तमी (*iv*) षष्ठी ..............................

(घ) 'सायंकाले तु सर्वत्र अन्धकारस्य राज्यम् एव भवति।' इत्यस्मिन् वाक्ये कति अव्ययाः सन्ति?

(*i*) द्वि (*ii*) त्रि (*iii*) चतुर् (*iv*) न कोऽपि ..............................

**IV. गद्यांशस्य समुचितं शीर्षकम् एकम् लिखत।**

(गद्यांश का उचित शीर्षक लिखिए।)

..............................................................

3. एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा एकां क्रन्दन-ध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्–''सिद्धार्थ! एषः मम हंसः। मया बाणेन एतत् अनिपातयत्। अतः मह्यम् देहि।'' सिद्धार्थः दृढ़तया अवदत्–''अहं न दास्यामि। अहम् अस्य रक्षकः अस्मि।'' तदा तौ विवादं कुर्वन्तौ राजसभां गतौ। राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत्–''यस्य पार्श्वे हंसः गमिष्यति सः तस्यैव भविष्यति।'' हंसः सिद्धार्थस्य समीपं गतवान्। सत्यमिदम् यत् ''भक्षकात् रक्षकः श्रेयान्।''

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) कः भूमौ पतितः आसीत्? ..........

(ख) हंसः कस्य समीपं गतवान्? ..........

(ग) कः हंसम् बाणेन अहन्? ..........

(घ) भक्षकात् कः श्रेयान्? ..........

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) सिद्धार्थः किम् कृत्वा हंसम् अङ्के अधारयत्?

..........

(ख) सिद्धार्थः दृढ़तया किम् अवदत्?

..........

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) उद्यानम् इति पदस्य पर्यायमेकम् अनुच्छेदात् चित्वा लिखत।

(*i*) विहारार्थम् (*ii*) उपवनम् (*iii*) क्रन्दनध्वनिम् (*iv*) आकर्ण्य ..........

(ख) भक्षक इति पदस्य कः विपर्ययः अनुच्छेदे आगतः?

(*i*) भक्षकात् (*ii*) विद्धः (*iii*) रक्षक (*iv*) श्रेयाम् ..........

(ग) अनुच्छेदे चित्तम् इति पदस्य विशेषणपदं किम् अस्ति?

(*i*) करुणया (*ii*) व्याकुलम् (*iii*) जातम् (*iv*) एतत् ..........

(घ) ''मया बाणेन अनिपातयत्'' इति वाक्ये 'मया' पदम् कस्मै आगच्छत्?

(*i*) हंसाय (*ii*) सिद्धार्थाय (*iii*) देवदत्ताय (*iv*) नृपाय ..........

**IV. कथायाः शीर्षकम् एकम् लिखत।**

(कथा का एक शीर्षक लिखिए।)

..........

4. एक: टोपिकाविक्रेता अनेकवर्णा: टोपिका: विक्रीणाति स्म। एकस्मिन् दिने श्रान्त: स: एकस्य वृक्षस्य शीतलायां छायायाम् उपाविशत्। शनै:-शनै: निद्रा तम् स्ववशे अकरोत्। स: पुटकं शिरस्तले निधाय अस्वपत्। वृक्षे स्थिता: वानरा: विविधवर्णयुक्ता: टोपिका: पुटके दृष्ट्वा अध: अवातरन्। शनै:-शनै: ते पुटकात् टोपिका: निष्कास्य शिरसि धारयित्वा वृक्षम् आरोहन्। प्रबुद्ध: टोपिकाविक्रेता यदा उपरि पश्यति तदा रक्तनीलवर्णा: टोपिका: धारयन्त: वानरान् पश्यति। "हा देव! नष्टा: मे सर्वा: टोपिका:!" इति विलपन् स: आत्मन: शिरसि धारितां टोपिकाम् अपि वेगेन भूमौ क्षिपति कथयति च–'रे दुष्टा:! एताम् अपि नयत।' प्रकृत्या अनुकरणशीला: वानरा: अपि स्वटोपिका: भूमौ प्रक्षिप्तवन्त:। आश्चर्यचकित: स: सर्वा: टोपिका: विचित्य, स्वपुटके स्थापयित्वा प्रसन्न: भूत्वा गृहं प्रति अचलत्।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) टोपिकाविक्रेता का: विक्रीणाति स्म? ..........

(ख) प्रकृत्या वानरा: कीदृशा: भवन्ति? ..........

(ग) श्रान्त: स: कुत्र उपाविशत्? ..........

(घ) स: पुटकम् कुत्र निधाय अस्वपत्? ..........

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) प्रबुद्ध: टोपिकाविक्रेता वृक्षे किम् अपश्यत्?

..........

(ख) टोपिकाविक्रेता वानरान् किम् कथयति?

..........

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) "एताम् अपि नयत" अत्र एताम् इति पदम् कस्मै आगच्छत्?

(*i*) वानरेभ्य: (*ii*) टोपिकायै (*iii*) ईश्वराय (*iv*) वृक्षाय ..........

(ख) अनुच्छेदे अध: इति पदस्य क: विपर्यय: आगत:?

(*i*) शनै: (*ii*) निधाय (*iii*) उपरि (*iv*) सर्वा: ..........

(ग) अनुच्छेदे प्रक्षिप्तवन्त: इति क्रियापदस्य कर्तृपदम् किम्?

(*i*) प्रकृत्या (*ii*) टोपिका: (*iii*) टोपिकाविक्रेता (*iv*) वानरा: ..........

(घ) रे दुष्टा:! इति क: कम् संबोधयति?

(*i*) ईश्वर: वानरान् (*ii*) वानरा: जनान्

(*iii*) वानरा: देवान् (*iv*) टोपिकाविक्रेता वानरान् ..........

**IV. कथाया: समुचितम् शीर्षकम् लिखत।**

(कथा का उचित शीर्षक लिखिए।)

..........

5. दीपावली प्राचीनतमं पर्वम् अस्ति। अस्मिन् दिने सर्वाधिकम् आकर्षकं मनोरञ्जनम् भवति स्फोटकानाम् आस्फोटनम्। विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरूपाणि दर्शयन्ति। जना: तानि दृष्ट्वा तुष्यन्ति। परन्तु अति सर्वत्र वर्जयेत्। रात्रौ आस्फोटकानां शब्द: कर्णौ बधिरी करोति वायुमण्डलं च दूषयति। पूर्वं तु जनसंख्या सीमिता आसीत्। वृक्षा: वायुं शुद्धं कुर्वन्ति स्म। इदानीम् जनसंख्या प्रवृद्धा, वृक्षसंख्या क्षीणा। विस्फोटकेभ्य: निर्गत: धूम: रुग्णान् पीडयति, नवजात शिशुभ्य: हानिकर: सिध्यति। दीपावली-समये शरदि आकाश: निर्मल: भवति। सर्वत्र पवित्रता विराजते। अत: वयम् आनन्देन दीपावलीम् मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम्। सर्वेषां जीवनं सुखमयं भवेत्। किं तेन उत्सवेन य: कस्मैचित् अपि कष्टकर: भवेत्। ''मा कश्चित् दु:खभाग् भवेत्'' इति अस्माकम् आदर्श:।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) केषाम् आस्फोटनम् सर्वेभ्य: आकर्षकं मनोरञ्जकम् च? ..................

(ख) दीपावली कस्यां ऋतौ भवति? ..................

(ग) वायुं के शुद्धं कुर्वन्ति? ..................

(घ) सर्वेषां जीवनं कीदृशं भवेत्? ..................

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) अस्माकं क: आदर्श:?

..................................................

(ख) स्फोटकानां धूम: कान् पीडयति?

..................................................

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) अनुच्छेदे प्रवृद्धा इत्यस्य विपर्ययपदम् किम् प्रयुक्तम्?

(*i*) इदानीम् (*ii*) जनसंख्या (*iii*) वृक्षसंख्या (*iv*) क्षीणा ..................

(ख) सर्वत्र पवित्रता विराजते अत्र अव्ययपदं किम्?

(*i*) सर्वत्र (*ii*) पवित्रता (*iii*) विराजते (*iv*) न किमपि ..................

(ग) अनुच्छेदे पर्वम् इत्यस्य किम् विशेषणपदम् प्रयुक्तम्?

(*i*) प्राचीनतमम् (*ii*) दीपावली (*iii*) आकर्षकम् (*iv*) आस्फोटनम् ..................

(घ) अनुच्छेदे लाभकर: इत्यस्य किम् विपर्ययपदम् प्रयुक्तम्?

(*i*) रुग्णान् (*ii*) हानिकर: (*iii*) हानिकारक: (*iv*) अलाभकर: ..................

**IV. अनुच्छेदस्य समुचितं शीर्षकम् लिखत।**

(अनुच्छेद का उचित शीर्षक लिखिए।)

..................................................

6. वर्तमानयुगं विज्ञानमयम्। अस्माकं सर्वासु क्रियासु विज्ञानतत्त्वानि एव विराजन्ते। पठनक्रियाम् एव पश्यन्तु। पठने अपि विज्ञानस्य सिद्धान्ताः अनुकरणीयाः। यदि नेत्रव्यायामः न करिष्यामः तर्हि नेत्रयोः विकारः भवितुं शक्नोति। पुस्तकं यदि नेत्रयोः अति समीपे भवति तर्हि पठितुं न शक्यते। यदा पुस्तकम् अतिदूरं भवति तदा अपि पठनं दुष्करं भवति। नेत्रविशेषज्ञाः कथयन्ति यत् प्रायः पञ्चविंशतिसेण्टिमीटरमितं (25 से०मी०) दूरम् अन्तरं समीचीनम् भवति। तावद्दूरं पुस्तकं गृहीत्वा पठने यदि बाधा न अस्ति तदा शोभनं परन्तु यदि न पठ्यते तदा नेत्रचिकित्सकस्य समीपे गत्वा नेत्रपरीक्षणं कारयेत् अन्यथा नेत्रदृष्टिः दुर्बला भवेत्। अपि च शयानः अपि न पठेत्। प्रतिदिनं च सूर्योदये नेत्रव्यायामः करणीयः येन वृद्धावस्थायाम् अपि उपनेत्रस्य आवश्यकता न भवेत्।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) वर्तमानयुगं कीदृशम् अस्ति? ..............................

(ख) नेत्रव्यायामः प्रतिदिनं कदा करणीयः? ..............................

(ग) पठने पुस्तकं नेत्राभ्याम् 25 से०मी० दूरं भवेत् इति के कथयन्ति? ..............................

(घ) पठने कस्य सिद्धान्ताः अनुकरणीयाः? ..............................

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) यदा पुस्तकम् अतिदूरं भवति तदा किं भवति?

..............................................................................................

(ख) कतिदूरात् पुस्तकम् पठनीयम्?

..............................................................................................

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) कठिनम् इति अर्थाय किम् पदम् अत्र प्रयुक्तम्?

(*i*) दुष्करम् (*ii*) काठिन्यम् (*iii*) सरलम् (*iv*) शक्यते ..............................

(ख) अतिसमीपम् इत्यस्य किम् विपर्ययपदम् अत्र प्रयुक्तम्?

(*i*) न समीपम् (*ii*) असमीपम् (*iii*) निकटम् (*iv*) अतिदूरम् ..............................

(ग) गत्वा इति पदे कः प्रत्ययः?

(*i*) तुमुन् (*ii*) क्त (*iii*) क्त्वा (*iv*) त्वा ..............................

(घ) अनुच्छेदे विराजन्ते इति क्रियापदस्य कर्तृपदं किम्?

(*i*) सर्वासु (*ii*) क्रियासु (*iii*) अस्माकम् (*iv*) विज्ञानतत्त्वानि ..............................

**IV. अनुच्छेदस्य समुचितं शीर्षकम् लिखत।**

(अनुच्छेद का उचित शीर्षक लिखिए।)

..............................................................

7. एकदा केचन् शिष्याः भिक्षाटनं कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत्। गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः पुनः घोषयति स्म–अपसरन्तु इति। सर्वे शिष्याः धावितवन्तः। यथा सर्वेषु वस्तुषु ईश्वरः अस्ति तथा गजे अपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावति काले गजः तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्छितं तं गुरुकुलम् अनयन्। लब्धसंज्ञम् तं गुरुः अपृच्छत्–वत्स! त्वम् एवम् किमर्थम् आचरः इति। शिष्यः अवदत्–गुरुवर्य! भवद्भिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति अतः अहं गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति। गुरुः उक्तवान्– "वत्स! यथा गजे तथा हस्तिपके अपि ईश्वरः" इति कथं न चिन्तितम् इति।

**I. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए।)

(क) गजः कम् स्वशुण्डया गृहीत्वा प्रक्षिपत्? ..........

(ख) अपसरन्तु अपसरन्तु इति कः घोषयति स्म? ..........

(ग) ईश्वरः सर्वेषु अस्ति इति केन शिक्षितम् आसीत्? ..........

(घ) मूर्छितः कः अभवत्? ..........

**II. पूर्णवाक्येन उत्तरत।**

(पूरे वाक्य में उत्तर दीजिए।)

(क) शिष्यः कुत्र संज्ञाम् अलभत्?

..........

(ख) कस्मिन् ईश्वरं विचिन्त्य शिष्यः तत्रैव स्थितवान्?

..........

**III. यथानिर्देशम् उत्तरत।**

(निर्देश के अनुसार उत्तर दीजिए।)

(क) वेगेन इति पदस्य विशेषणपदम् किम्?

(*i*) मार्गे (*ii*) एकः (*iii*) महत (*iv*) तस्मिन् ..........

(ख) अपसरन्तु इत्यस्य कर्तृपदम् लिखत?

(*i*) गजाः (*ii*) हस्तिपकाः (*iii*) गुरु (*iv*) शिष्याः ..........

(ग) तस्मिन् एव समये इत्यस्मै अनुच्छेदे किम् पदम् प्रयुक्तम्?

(*i*) पुनः (*ii*) तदैव (*iii*) तावति काले (*iv*) तत्रैव ..........

(घ) हस्तिपके इत्यस्य पदे का विभक्तिः?

(*i*) प्रथमा (*ii*) द्वितीया (*iii*) पञ्चमी (*iv*) सप्तमी ..........

**IV. कथायाः समुचितं शीर्षकम् लिखत।**

(कथा का उचित शीर्षक लिखिए।)

..........

# अभ्यास-प्रश्नपत्रम्–1

अवधिः–होराद्वयम् | पूर्णाङ्काः–75

**1. निम्नाङ्कितेषु रञ्जितपदेषु सन्धिः सन्धिच्छेदः वा कुरुत।** $1 \times 5 = 5$

(क) तच्छरेण तरुशाखा छिन्ना अभवत्। ..........

(ख) सा नयनम् निमीलयति। ..........

(ग) द्वौ साधू + अस्मिन् वने अवसताम्। ..........

(घ) पावकः तु पवित्रं करोति। ..........

(ङ) मूर्खेण पुत्रेण कः + अर्थः? ..........

**2. अधोलिखितेषु रञ्जितपदेषु समासं विग्रहं वा कृत्वा समासनामानि अपि लिखत।** $1 \times 5 = 5$

(क) राज्ञः पुरुषः गृहात् राजभवनम् गच्छति। .......... ..........

(ख) जन्तुशालायां एकः श्वेतः द्विपः अस्ति। .......... ..........

(ग) तव अश्वः उपवटम् एव चलति। .......... ..........

(घ) दशाननः लंकायाः अधिपतिः आसीत्। .......... ..........

(ङ) मासे मासे इति वयम् वृन्दावनं गच्छामः। .......... ..........

**3. प्रकृतिप्रत्ययोः विभागं संयोजनं वा कुरुत।** $1 \times 5 = 5$

(क) बलवान् = .......... + ..........

(ख) √पठ् + क्त्वा प्रत्ययः = ..........

(ग) दानिन् = .......... + ..........

(घ) √त्यज् + तुमुन् प्रत्ययः = ..........

(ङ) करणीयः = .......... + ..........

**4. निम्नाङ्कितैः अव्ययपदैः वाक्यनिर्माणं कुरुत।** $1 \times 5 = 5$

(क) इतस्ततः = ..........

(ख) मुहुर्मुहुः = ..........

(ग) अपि = ..........

(घ) तत्र = ..........

(ङ) इव = ..........

**5. निम्नलिखितरिक्तस्थानानि वाच्यानुसारं पूरयत।** $1 \times 5 = 5$

(क) चित्रकारः .......... (चित्र) अरचयत्।

(ख) छात्रेण ग्रन्थः .......... । (√पठ्)

(ग) गायकः गीतम् .......... । (√गै)

(घ) मया त्वम् .......... । (√दृश्)

(ङ) भवान् कुत्र ..........? (√गम्)

**6. अङ्केन लिखितान् समयान् पदेन लिखत।** $1 \times 5 = 5$

(क) 4.15 = .......... वादनम्।

(ख) 9.00 = .......... वादनम्।

(ग) 3.45 = .................................. वादनम्।          (घ) 1.30 = .................................. वादनम्।

(ङ) 12.00 = .................................. वादनम्।

**7. निम्नाङ्कितवस्तूनि गणयित्वा कोष्ठकात् उचितपदं चित्वा संस्कृतेन लिखत।** **1 × 5 = 5**

(क) पत्राणि  .................................. (चत्वार:/चत्वारि)

(ख) क्रीडनकाणि  .................................. (त्रीणि/त्रय:)

(ग) पुस्तकानि  .................................. (चतस्र:/चत्वारि)

(घ) तारका:  .................................. (विंशति:/एकोनविंशति:)

(ङ) मोदकानि  .................................. (पञ्चदश/षोडश)

**8. रञ्जितपदे अशुद्धिशोधनम् कृत्वा वाक्यानि पुन: लिखत।** **1 × 5 = 5**

(क) मम भ्रातु: विवाह: श्व: एव अस्ति। ..................................

(ख) एषा राजस्य आज्ञा अस्ति। ..................................

(ग) नरा: उद्यानं व्यायामं कुर्वन्ति। ..................................

(घ) एषा अग्नि: किमर्थम् ज्वलति? ..................................

(ङ) कक्षायाम् अलम् कोलाहलात्। ..................................

**9. निम्नलिखितशब्दानाम् पर्यायमेकम् लिखत।** **1 × 3 = 3**

(क) तीक्ष्ण: ..................................   (ख) अजीर्णम् ..................................   (ग) आभरणम् ..................................

**10. अधोलिखितानाम् विपर्ययमेकम् लिखत।** **1 × 2 = 2**

(क) गत्वा ..................................   (ख) चेतन: ..................................

**11. रूपाणि लिखित्वा उचितपदै: रिक्तस्थानानि पूरयत।** **1 × 5 = 5**

| | | | | | | |
|---|---|---|---|---|---|---|
| (क) पक्ष्यति | .................. | पक्ष्यन्ति | (ख) लभसे | लभेथे | .................. | |
| (ग) .................. | वर्धावहे | वर्धामहे | (घ) .................. | मुनिभ्याम् | मुनिभि: | |
| (ङ) मात्रे | मातृभ्याम् | .................. | | | | |

**12. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।** **10**

पुरा दुष्यन्तस्य पुत्र: भरत: नाम महान् प्रतापी राजा आसीत्। तस्य नाम्ना एव अस्माकं देशस्य नाम भारतम् इति अभवत्। भारतम् अस्माकम् मातृभूमि: अस्ति। भारतम् अस्माकम् प्राणै: अपि प्रियतरम्। वयम् अत्र वसाम: खादाम: जीवनस्य च सर्वम् सुखम् च प्राप्नुम:। अस्य प्राचीनं नाम आर्यावर्त: आसीत्। हिन्दूनां स्थानेन हिन्दुस्थानम् पुन: हिन्दुस्तान तथा भारतवर्षम् अपि कथ्यते। अस्य संस्कृति: अति प्राचीना अस्ति।

**I. एकपदेन उत्तरत।** ½ × 4 = 2

(क) राजा दुष्यन्तस्य पुत्रः कः आसीत्? ..........

(ख) भरतः कीदृशः राजा आसीत्? ..........

(ग) कस्य नाम्ना अस्माकं देशस्य नाम भारतम् इति? ..........

(घ) भारतम् अस्माकम् कैः अपि प्रियतरम्? ..........

**II. पूर्णवाक्येन उत्तरत।** 2 × 2 = 4

(क) वयम् भारते किम् प्राप्नुमः?

..........

(ख) भारतस्य संस्कृतिः कीदृशी अस्ति?

..........

**III. निर्देशानुसारम् उत्तरत।** ½ × 4 = 2

(क) अनुच्छेदे महान् विशेषणस्य विशेष्यं किम् अस्ति?

(*i*) पुत्रः (*ii*) भरतः (*iii*) प्रतापी (*iv*) राजा ..........

(ख) खादामः क्रियापदस्य कर्तृपदम् किम्?

(*i*) अहम् (*ii*) त्वम् (*iii*) यूयम् (*iv*) वयम् ..........

(ग) प्राणै इति पदे का विभक्तिः अस्ति?

(*i*) प्रथमा (*ii*) द्वितीया (*iii*) तृतीया (*iv*) चतुर्थी ..........

(घ) नाम इति शब्दस्य लिङ्गम् किम्?

(*i*) पुंल्लिङ्गम् (*ii*) स्त्रीलिङ्गम् (*iii*) नपुंसकलिङ्गम् ..........

**IV. गद्यांशस्य कृते उचितं शीर्षकं लिखत।** 2 × 1 = 2

..........

**13. मञ्जूषातः पदानि विचित्य अधोलिखितानि पत्राणि पूरयत।** 1 × 5 = 5

**स्वअध्ययनस्य प्रगतेः विषये अग्रजम् प्रति पत्रम् पूरयत।**

वसन्तकुञ्जनगरम्

(*i*)..........

29.10.20XX

पूज्य भ्रातः,

(*ii*).......... ।

अत्र कुशलम् तत्र अस्तु। अहम् (*iii*).......... प्रगतिविषये किञ्चित् लिखितुम् इच्छामि। अधुना मम शिक्षणम् तु (*iv*).......... आरब्धम्। अहम् (*v*).......... प्रातः सार्धचतुर्वादने उत्तिष्ठामि। षड्वादनपर्यन्तम् पठितानाम् (*vi*).......... आवृत्तिं करोमि। सार्धषड्वादने विद्यालयं गमनाय तत्परः (*vii*).......... । विद्यालयात्

आगत्य अहम् सायंकाले गणितस्य (*viii*).................. करोमि। अतएव अधुना गणिते मम दुर्बलता दूरीभूता। संस्कृतविषयेऽपि अहम् प्रथमम् (*ix*).................. प्राप्तवान्। पितृभ्याम् मम प्रणामाः।

(*x*).................. अनुजः

राजेशः

सादरं नमस्कारः, नियमेन, भवामि, भवदीयः, पाठानाम्,
अभ्यासम्, स्थानम्, नवदेहली, स्वाध्ययनस्य, प्रतिदिनम्

**14.** निम्नचित्रस्य वर्णनं मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्येषु कुरुत। **1 × 5 = 5**




छात्राः, परीक्षानाम्,
परीक्षाभवनं, ससंशयाः,
लिखन्ति, निरीक्षकः, केचन्,
प्रश्नं, चिन्तितः, प्रसन्नः,
परस्परं, एका बाला

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

**15.** अधोलिखितान् संवादान् मञ्जूषायां प्रदत्तशब्दैः पूरयन्तु। **1 × 5 = 5**

द्रोणाचार्यः वृक्षे कृत्रिमखगम् स्थापयित्वा परीक्षितुम् युधिष्ठिरम् कर्तृवाच्ये प्रश्नं पृच्छति। युधिष्ठिरः च कर्मवाच्ये उत्तराणि यच्छति। वाच्यानुसारम् संवादे रिक्तस्थानानि पूरयत।

**द्रोणाचार्यः** – भो युधिष्ठिर! (*i*).................. कः तिष्ठति?

**युधिष्ठिरः** – आचार्य, वृक्षे एकेन (*ii*).................. स्थीयते।

**द्रोणाचार्यः** – त्वम् अन्यत् किं पश्यसि?

**युधिष्ठिरः** – मया वृक्षः अपि (*iii*)..................?

**द्रोणाचार्यः** – किम् (*iv*).................. माम् अपि पश्यसि?

**युधिष्ठिरः** – आम् (*v*).................. भवान् अपि अवलोक्यते।

**द्रोणाचार्यः** – त्वम् कस्य लक्ष्यस्य वेधं कर्तुम् (*vi*)..................?

दृश्यते, मया, वृक्षे, इच्छसि, खगेन, त्वम्

# अभ्यास-प्रश्नपत्रम्-2

अवधिः–होराद्वयम् | पूर्णाङ्काः–75

**1. अधोलिखितेषु सन्धिम् सन्धिच्छेदम् वा कुरुत।** $1 \times 5 = 5$

(क) मम् विद्यालये वार्षिक + उत्सवः अभवत्। ..........

(ख) इदम् उन्नतम् भो + अनम् पश्य। ..........

(ग) वृक्षाः परोपकाराय एव फलन्ति। ..........

(घ) स्वच्छन्दाः खगाः उड्डयन्ति। ..........

(ङ) त्वम् ईश्वरस्य परम भक्तोऽसि। ..........

**2. यथानिर्दिष्टरूपाणि लिखत।** $1 \times 5 = 5$

(क) √नम्–लृट्लकारे मध्यमपुरुषः (एकवचने) ..........

(ख) √लभ्–लोट्लकारे प्रथमपुरुषः (बहुवचने) ..........

(ग) √पा–लङ्लकारे उत्तमपुरुषः (द्विवचने) ..........

(घ) गुरु शब्द षष्ठीविभक्तेः (द्विवचने) ..........

(ङ) नदी शब्द सप्तमीविभक्तिः (बहुवचने) ..........

**3. निम्नलिखितेषु समासं समासविग्रहं वा कृत्वा समासनामानि लिखत।** $1 \times 5 = 5$

(क) अनुरथम् .......... ..........

(ख) वारिदः .......... ..........

(ग) महानचासौ आत्मा .......... ..........

(घ) रामलक्ष्मणभरतशत्रुघ्नाः .......... ..........

(ङ) नीलकमलम् .......... ..........

**4. निम्नलिखितेषु प्रकृतिप्रत्ययविभागं संयोजनं वा कुरुत।** $1 \times 5 = 5$

(क) हनुमान् .......... + ..........

(ख) गतः .......... + ..........

(ग) √नम् + क्त्वा ..........

(घ) √कृ + तुमुन् ..........

(ङ) पठनीयः .......... + ..........

**5. मञ्जूषातः उचितं अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** $1 \times 5 = 5$

(क) .......... सोमवारः अस्ति।

(ख) .......... भौमवासरः भविष्यति।

(ग) परश्वः .......... बुधवासरः भविष्यति।

(घ) हरिम् .......... मम कः सहायकः भविष्यति।

(ङ) कक्षायाम् .......... मा वद।

च, उच्चैः, अद्य, विना, श्वः

6. निम्नलिखितकर्तृवाच्ये कर्मवाच्ये च उचितपदैः रिक्तस्थानानि पूरयत। $1 \times 5 = 5$

| कर्तृवाच्यः | कर्मवाच्यः |
|---|---|
| (क) ऋषिः .................. रचयति। | .................. ग्रन्थः रचयते। |
| (ख) ते तु .................. गच्छन्ति। | .................. तु विद्यालयं गम्यते। |
| (ग) .................. बीजानि वपन्ति। | कृषकैः .................. वप्यन्ते। |
| (घ) .................. दुष्ट कसाबः अपि पश्चात्तापं करोति। | न्यायालये .................. अपि पश्चातापः क्रियते। |
| (ङ) .................. याचकाय धनम् यच्छति। | धनिकेन याचकाय धनम् .................. । |

7. कोष्ठकेप्रदत्तं समयम् रिक्तस्थानेषु संस्कृतपदेन लिखत। $1 \times 5 = 5$

(क) प्रभाते (6.00) .................. एकः अतिथिः मम गृहे आगच्छति।

(ख) जलम् पीत्वा (6.30) .................. वादने सः स्नानं करोति।

(ग) (6.45) .................. वादने सः मया सह प्रातराशम् करोति।

(घ) सः मम जनकेन सह (7.15) .................. वादने वार्त्ताम् करोति।

(ङ) सः भोजनम् कृत्वा मध्याह्ने (2.00) .................. वादने कालिदासस्य अभिज्ञान-शाकुन्तलम् नाटकम् पठति।

8. यथोचितसंख्यावाचिपदैः रिक्तस्थानानि पूरयत। $1 \times 5 = 5$

(क) भगवतः शिवस्य (3) .................. नेत्राणि सन्ति।

(ख) महाकविभासस्य (13) .................. ग्रन्थाः प्राप्ताः सन्ति।

(ग) तव समीपे (9) .................. रुप्यकाणि सन्ति।

(घ) मम समीपे (1) .................. स्वर्णमुद्रा अस्ति।

(ङ) (4) .................. बालिकाः कन्दुकेन क्रीडन्ति।

9. निम्नलिखितपदानाम् विपर्ययमेकम् लिखत। $1 \times 3 = 3$

(क) सरलः .................. (ख) श्वेतः .................. (ग) प्राचीना ..................

10. निम्नलिखित पदानाम् पर्यायम् एकम् लिखत। $1 \times 2 = 2$

(क) कुञ्जरः .................. (ख) गुहा ..................

11. निम्नलिखितवाक्येषु रञ्जितपदानाम् अशुद्धिशोधनम् कृत्वा वाक्यानि पुनः लिखत। $1 \times 5 = 5$

(क) तव **पत्रः** मम समीपे अस्ति। ..................

(ख) सः **मुनी** मूषकम् सिंहम् अकरोत्। ..................

(ग) भवान् चायपानं **कुरु** । ..................

(घ) एषः **कोकिला** गायति। ..................

(ङ) **माम्** संस्कृतपठनम् रोचते। ..................

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत। **10**

एक: भिक्षुक: भिक्षाटनाय ग्रामात् ग्रामं गच्छति स्म। स: सदा भिक्षां प्राप्त्वा सन्तुष्ट: च भूत्वा ईश्वरस्य धन्यवाद: करोति स्म। ईश्वरस्य भजनं कृत्वा सुखेन रात्रौ स्वपिति स्म। एकदा स: भिक्षार्थाय एकस्मिन् ग्रामे अगच्छत्। कस्यचित् धनिकस्य गृहात् बहि: स्थित: भिक्षुक: श्रुतवान्–''देव! मह्यम् पुत्रम् ददातु।''' अहो! अयम् तु स्वयम् एव याचक:' इति चिन्तयित्वा भिक्षुक: अग्रे प्रस्थित:। अन्यस्मिन् गृहे एक: व्यापारी प्रार्थयते स्म–'भगवति! मम व्यापारे लाभ: भवतु।' भिक्षुक: चिन्तितवान्–'अरे। एते तु महत्तरां भिक्षाम् याचन्ते। अहं तु केवलं भोजनं याचे। अहम् एव भाग्यवान् यत: अहं सन्तुष्ट: अस्मि।'

I. एकपदेन उत्तरत। **½ × 4 = 2**

(क) भिक्षुक: किं याचते स्म? ..........

(ख) भगवतीं क: प्रार्थयते स्म? ..........

(ग) अहम् एव भाग्यवान् इति क: चिन्तयति? ..........

(घ) 'अयम् तु स्वयमेव याचक:' इति चिन्तयित्वा भिक्षुक: कुत्र प्रस्थित:? ..........

II. पूर्णवाक्येन उत्तरत। **2 × 2 = 4**

(क) भिक्षुक: आत्मानम् भाग्यवान् इति कथं मन्यते?

..........

(ख) व्यापारी किम् प्रार्थयते स्म?

..........

III. निर्देशानुसारम् उत्तरत। **½ × 4 = 2**

(क) भिक्षाम् इत्यस्य विशेषणपदम् किम्?

*(i)* एते *(ii)* तु *(iii)* महत्तरां *(iv)* किमपि ..........

(ख) 'देव! मह्यम् पुत्रं ददातु' अत्र मह्यम् इति सर्वनामपदम् कस्मै प्रयुक्तम् अस्ति?

*(i)* भिक्षुकाय *(ii)* धनिकाय *(iii)* ईश्वराय *(iv)* पुत्राय ..........

(ग) अनुच्छेदे अस्मि क्रियापदस्य कर्तृपदम् किम्?

*(i)* ते *(ii)* एते *(iii)* त्वम् *(iv)* अहम् ..........

(घ) 'एते तु महत्तरां भिक्षाम् याचन्ते।' अस्मिन् वाक्ये अव्यय: क:?

*(i)* एते *(ii)* तु *(iii)* याचन्ते *(iv)* भिक्षाम् ..........

IV. अनुच्छेदस्य कृते एकम् शीर्षकम् लिखत। **2 × 1 = 2**

..........

13. मञ्जूषात: पदानि विचित्य अधोलिखितं पत्रं पूरयत। **1 × 5 = 5**

**स्वविद्यालये आयोजितम् रक्तदानशिविरे रक्तदानस्य विषये स्वपितरं प्रति पत्रं पूरयत।**

मानवस्थली छात्रावास:,<br>
वीरेन्द्रग्राम:<br>
तिथि: 27.05.20XX<br>
पूज्य पितृमहोदय,<br>
चरणवन्दना।

अहम् भवन्तम् सविनयम् निवेदयामि यत् (*i*) .................. विद्यालये ह्य: रक्तदानशिविरम् आयोजितम्। अस्माकम् (*ii*) .................. महोदय: अत्र मुख्यातिथि: आसीत्। सर्वप्रथमम् स: एव (*iii*) .................. अकरोत्। तदा (*iv*) .................. कृत्वा सर्वे अध्यापका: रक्तदानम् अकुर्वन्। सर्वे (*v*) .................. अपि एतस्मिन् (*vi*) .................. अग्रे आसन्। मम (*vii*) .................. अपि रक्तदानस्य भावना (*viii*) .................. अभवत्। अहम् स्वमित्रेण सह (*ix*) .................. अयच्छम्। आशासे यत् भवान् मम भावनां (*x*) .................. प्रसन्न: भविष्यति।

भवदीय: पुत्र:

अनूप:

उत्पन्ना, ज्ञात्वा, मनसि, शुभकार्ये, निदेशक:, रक्तदानम्, एकैकम्, छात्रा:, अस्माकम्, स्वरक्तम्

**14. निम्नचित्रस्य वर्णनम् मञ्जूषा प्रदत्तशब्दानाम् सहायतया पञ्चवाक्येषु कुरुत।** **1 × 5 = 5**



पर्वतीयम्, प्रदेशम्, रमणीयम्, खगा:, उन्नतानि, शिखराणि, सरोवर:, तरति, नौका, जना:, प्रसीदन्ति, उड्डयन्ति

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

**15. अधोलिखितान् संवादान् मञ्जूषायां प्रदत्ततशब्दै: पूरयत।** **1 × 5 = 5**

**मयूर:** – हे पिक! तव स्वरम् तु अतीव (*i*) .................. अस्ति।

**पिक:** – जानामि, जानामि परं मम समीपे तु (*ii*) .................. पक्षा: न सन्ति। पश्य उलूकम्। अस्य दर्शनम् एव (*iii*) .................. भवति।

**उलूक:** – शृणुत (*iv*) .......... मंगलम् स्वरम्। अहम् मन्ये (*v*) .......... मम गृहे क: अपि आगमिष्यति।

शुभम्, अद्य, मधुरम्, विविधवर्णा:, काकस्य